


https://www.chalisa.online

|| पञ्चामृत स्नानाभिषेकम् ||

क्षीराभिषेकं

आप्यायस्व समेतु ते विश्वतस्सोमवृष्णियं । भवावाजस्य सङ्गधे ॥ क्षीरेण स्नपयामि

दध्याभिषेकं

दधिक्रावण्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभिनो मुखाकरत्प्रण आयूंगं्षितारिषत् ॥ दध्ना स्नपयामि ॥

आज्याभिषेकं

शुक्रमसि ज्योतिरसि तेजोऽसि देवोवस्सवितोत्पुना त्वच्छिद्रेण पवित्रेण वसो स्सूर्यस्य रश्मिभिः ॥ आज्येन स्नपयामि ॥

मधु अभिषेकं

मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नस्संत्वोषधीः । मधुनक्त मुतोषसि मधुमत्पार्थिवग्ं रजः । मधुद्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाग्ं अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥ मधुना स्नपयामि ॥

शर्कराभिषेकं

स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतु नाम्ने । स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाग्ं अदाभ्यः ॥ शर्करया स्नपयामि ॥

याः फलिनीर्या अफला अपुष्पायाश्च पुष्पिणीः । बृहस्पति प्रसूतास्तानो मुञ्चस्त्वग्ं हसः ॥ फलोदकेन स्नपयामि ॥

शुद्धोदक अभिषेकं

ॐ आपो हिष्ठा मयोभुवः । ता न ऊर्जे दधातन । महेरणाय चक्षसे । यो वः शिवतमो रसः । तस्य भाजयते ह नः । उषतीरिव मातरः । तस्मा अरङ्ग माम वः । यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ इति पञ्चामृतेन स्नापयित्वा ॥

|| https://www.chalisa.online ||